निवर्त्तयेत्तथा क्रोधादनुह्लादं हतात्मजम् ॥
हतमैलं तथा लोभान्मदाद्वेणं द्विजैर्हतम् ।
मानाद्दनायुषः पुत्त्रं हतं हर्षात् पुरञ्जयम् ॥
एभिर्जितैर्जितं सर्व्वं मरुत्तेन महात्मना ।
स्मृत्वा विवर्ज्जयेदेतान् षड़्दोषांश्च महीपतिः ॥
काककोकिलभृङ्गाणां बकव्यालशिखण्डिनाम् ।
हंसानां लोहकुट्टानां शिक्षेत चरितं नृपः ॥"
काकात् सर्व्वशङ्किता । कोकिलात् माधुर्य्यम् । भृङ्गात् प्रपीड़या अर्थादानम् । बकात् शत्रुग्रहणे एकाग्रताम् । व्यालात् दुरुपसर्पित्वम् । शिखण्डिनश्चित्रतां सर्पग्रहणाय मूकतां राज्ञा-वात्मगोपनञ्च । हंसस्य सारग्राहित्वम् । लोहकुट्टात् सन्धानम् ॥
"कौशिकस्य क्रियां कुर्य्याद्विपक्षे मनुजेश्वरः ।
चेष्टां पिपीलिकानाञ्च काले भूपः प्रदर्शयेत् ॥"
कौशिकस्य उलूकस्य रात्रौ काकावस्कन्दनम् । पिपीलिकानां सैनाबहुत्वं सर्पभक्षणञ्च ।
"ज्ञेयाग्निविस्फुलिङ्गानां बीजचेष्टा च शाल्मलेः ।
चन्द्रसूर्य्यस्वरूपञ्च नीत्यर्थे पृथिवीक्षिता ॥"
अग्निविस्फुलिङ्गात् दूरात् दाहः । बीजात् हृदयनिष्पादनम् । उष्णकाले चन्द्रः सुखदायी शीतकाले न । एवं सूर्य्यः शीते सुखदायी उष्णकाले न । एवं कालानुसारेण सुखदुःखदातृत्वम् ॥
"बधकात् पद्मशरभशूलिभ्यो गुर्व्विणीस्तनात् ।
प्रज्ञा नृपेण चादेया तथा चण्डालयोषितः ॥"
बधकात् निष्ठुरत्वम् । पद्मात् कण्टकगोपनं स्मितमुखता च । शरभात् हत्वापि शत्रून् मोदकः । यथा शरभोऽष्टापदः परोन्नतिं न सहते । शूलिभ्यः आशिर्ज्ञापनम् । गुर्व्विण्यां स्तनात् कालेऽर्थादानम् । चण्डालयोषित् शौनको क्षणशिरो दर्शयित्वा अन्यद्विक्रीणाति ।
"शक्रार्कयमसोमानां तद्वद्वायोर्महीपतिः ।
रूपाणि पञ्च कुर्व्वीत महीपालनकर्म्मणि ॥
यथेन्द्रश्चतुरो मासान् वार्य्यौघेणैव भूतलम् ।
आप्याययेत्तथा लोकान् परिहारैर्महीपतिः ॥"
परिहारैरर्थदानादिभिः ।
"मासानष्टौ यथा सूर्य्यस्तोयं हरति रश्मिभिः ।
सूक्ष्मेणैवाभ्युपायेन तथा शुल्कादिना नृपः ॥
यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा प्रियाप्रियौ राजा दुष्टादुष्टे समो भवेत् ॥
पूर्णेन्दुमालोक्य यथा प्रीतिमान् जायते नरः ।
एवं यत्र प्रजाः सर्व्वा निर्वृतास्तच्छशिव्रतम् ॥
मारुतः सर्व्वभूतेषु निगूढ़श्चरते यथा ।
एवं चरेच्चरैश्चारैः पौरामात्यारिबन्धुषु ॥
न लोभार्थैर्न कामार्थैर्नार्थार्थैर्यस्य मानसम् ।
यदार्थैः कृष्यते धर्म्मान् स राजा स्वर्गमृच्छति ॥"
लोभादिपर्य्योजनैः ।
"उत्पथग्राहिणो मूढ़ान् स्वधर्म्माच्चलितात्ररान् ।
यः करोति निजे धर्म्मे स राजा स्वर्गमृच्छति ॥"
उत्पथग्राहिणः पापिनः ।
"वर्णधर्म्मा न सीदन्ति यस्य राष्ट्रे तथाश्रमाः ।
राजंस्तस्य सुखं तात परत्रेह च शाश्वतम् ॥
एतद्राज्ञः परं कृत्यं तथैतद्वृद्धिकारणम् ।
स्वधर्म्मे स्थापनं नॄणां चाल्यते न कुबुद्धिभिः ॥
पालनेनैव भूतानां कृतकृत्यो महीपतिः ।
सम्यक् पालयिता भागं धर्म्मस्याप्नोति वै यतः ॥
एवमाचरते राजा चातुर्व्वर्ण्यस्य रक्षणे ।
स सुखी विहरत्येष शक्रस्येति सलोकताम् ॥"
इति मार्कण्डेयपुराणे मदालसोपाख्याननाध्यायः तट्टीका च ॥ * ॥ राजाभिषेकस्य विहितनक्षत्राणि यथा,—
"पुष्यानुराधा ज्येष्ठा च रोहिणी चोत्तरात्रयम् ।
हस्ताश्विनी रेवती च नृपाभिषेचनोत्तमाः ॥"
इति ज्योतिःसारसंग्रहः ॥
अस्य विवरणं अभिषेकशब्दे द्रष्टव्यम् ॥ * ॥
राज्ञि वर्णनीयानि यथा,—
"नृपे कीर्त्तिप्रतापाज्ञादुष्टशास्तिविवेकिताः ।
धर्म्मप्रयाणसंग्रामशस्त्राट्याः सनयक्षमाः ॥
प्रजारागोऽरिशैलादिवासोऽरिपुरशून्यता ।
औदार्य्यधैर्य्यगाम्भीर्य्यशौर्य्यैश्वर्य्योद्यमादयः ॥"
इति कविकल्पलतायाम् १स्तवके ३कुसुमम् ॥*॥
राजान्नभक्षणे दोषो यथा,—
वाराह उवाच ।
"शुद्धा भागवता भूत्वा मम कर्म्मपरायणाः ।
ये तु भुञ्जन्ति राजान्नं लोभेन च भयेन च ॥
आपद्गता हि भुञ्जीत राजान्नन्तु वसुन्धरे ।
दशवर्षसहस्राणि पच्यन्ते नरके नराः ॥
भगवद्वचनं श्रुत्वा सा मही शंसितव्रता ।
उवाच मधुरं वाक्यं सर्व्वलोकसुखावहम् ॥
धरण्युवाच ।
शृणु तत्त्वेन मे देव हृदये हि व्यवस्थितम् ।
को नु दोषो हि राजान्नं तन्मे त्वं वक्तुमर्हसि ॥
ततो भूम्या वचः श्रुत्वा सर्व्वधर्म्मविदां वरः ।
प्राह नारायणो वाक्यं धर्म्मकामां वसुन्धराम् ॥
वाराह उवाच ।
शृणु सुन्दरि ! तत्त्वेन गुह्यमेतदनिन्दिते ।
राजान्नन्तु न भोक्तव्यं शुभैर्भागवतैः सदा ॥
यद्यप्येष समत्वेन राजा लोके प्रवर्त्तते ।
राजसस्तामसो वापि कुर्व्वन् कर्म्म सुदारुणम् ॥
अपि वा गर्हितं तेन राजान्नन्तु वसुन्धरे ।
धर्म्मसंस्थारणार्थाय न तु मे रोचते भुवि ॥
ततोऽन्यं संप्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा राजान्नं भोज्यं वै शुद्धैर्भागवतैः शुभैः ॥
स्थापयित्वा तु मां देवि विधिदृष्टेन कर्म्मणा ।
धनधान्यप्रदृष्टानि दत्त्वा भागवतैरपि ॥
सिद्धं भागवतेभ्यश्चान्नं मम प्रापणशेषकम् ।
भुञ्जानस्तु वरारोहे न स पापेन लिप्यते ॥
एवं विष्णुवचः श्रुत्वा धरणी शंसितव्रता ।
वाराहरूपिणं देवं प्रत्युवाच वरानना ॥"*॥
तदन्नभोजनप्रायश्चित्तानि यथा,—
धरण्युवाच ।
"राजान्नन्तु ततो भुक्त्वा शुद्धो भागवतः शुचिः ।
कर्म्मणा केन शुद्धात तन्मे ब्रूहि जनार्द्दन ॥
वाराह उवाच ।
शृणु तत्त्वेन मे देवि यन्मां त्वं भीरु भाषसे ।
तरन्ति मनुजा येन राजान्नस्योपभुञ्जकाः ॥
एकं चान्द्रायणं कृत्वा तप्तकृच्छ्रञ्च पुष्कलम् ।
कुर्य्यात् सान्तपनञ्चैकं शीघ्रं मुच्यति किल्बिषात् ॥
भुक्त्वा वै राज्ञोऽन्नानि इदं कर्म्म समारभेत् ।
न तस्यैवापराधोऽस्ति वसुधे वै वचो मम ॥
एवमेव न भोक्तव्यं राजान्नन्तु कदाचन ।
ममात्र प्रियकामाय यदीच्छेत् परमां गतिम् ॥"
इत्यादि वाराहे राजान्नभक्षणप्रायश्चित्तं नामाध्यायः ॥ * ॥ अपि च ।
"राजान्नं तेज आदत्त शूद्रान्नं ब्रह्मवर्चसम् ।
इत्याद्यभिधाय,—
भुक्त्वा चान्यतमस्यान्नममत्या क्षपयेत्र्यहम् ।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतो विण्मूत्रमेव च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(राजनम् । यथा, ऋग्वेदे । १० । ४६ । ४ ।
"अहं भुवं यजमानस्य राजनि ।"
"अहं यजमानस्य राजनि राजनार्थे भुवं अभवं समर्थे इति शेषः ।" इति तद्भाष्ये सायणः ॥)

राजातनः, पुं, (राजानं अततीति । अत सातत्यगमने + "बहुलमन्यत्रापि ।" उणा० २ । ७८ । इति युच् ।) पियालवृक्षः । इति शब्दमाला ॥

राजादनं, क्ली, (राजभिरद्यते इति । अद भक्षणे + कर्म्मणि ल्युट् ।) चौरिका । पियालः । किंशुकः । इति मेदिनी । ने, २०५ ॥ (यथा, सुश्रुते । १ । ४६ । फलवर्गे ।
"दाड़िमामलकं द्राक्षा खर्ज्जूरं सपरूषकम् ।
राजादनं मातुलुङ्गं फलवर्गे प्रशस्यते ॥"
पुंलिङ्गान्तोऽपि दृश्यते । इत्यमरः । २ । ४ । ४५ ॥ हेमचन्द्रश्च । ४ । २०८ ॥ क्षीरिकार्थे पर्य्यायो यथा,—
"राजादनः क्षीरवृक्षः पालाशो वानरप्रियः ॥"
इति वैद्यकरत्नमालायाम् ॥
किंशुकार्थे पर्य्यायो यथा,—
"वातपोथः पलाशः स्याद्ब्राह्मणवृक्षश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोऽपरः ॥")

राजानुजीवी, [न्] त्रि, (राज्ञः अनुजीवी ।) राजोपजीवी । तस्य कर्म्माणि यथा,—
मत्स्य उवाच ।
"यथानुवर्त्तितव्यं स्यात्मनो राजोपजीविना ।
तथा ते कथयिष्यामि निबोध गदतो मम ॥
आज्ञा सर्व्वात्मना कार्य्या स्वशक्त्या रविनन्दन ।
आक्षिप्य वचनन्तस्य न वक्तव्यं तथा वचः ॥
अनुकूलं प्रियन्तस्य वक्तव्यं जनसंसदि ।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ॥
परार्थमस्य वक्तव्यं स्वस्थे चेतसि भार्गव ।
स्वार्थः सुहृद्भिर्वक्तव्यो न स्वयन्तु कदाचन ॥
कार्य्याभिघातः सर्व्वेषु रक्षितव्यः प्रयत्नतः ।
न च हिंस्यं धनं किञ्चिन्नियुक्तेन च कर्म्मणि ॥
नोपेक्ष्यं भाष्यमाणञ्च तथा राज्ञः प्रियो भवेत् ।